# Vajrayoginyah Stutipranidhanam

# વજ્રયોગિન્યાઃ સ્તુતિપ્રણિધાનમ્

## Document Information

Text title : Vajrayoginyah Stutipranidhanam

File name : vajrayoginyAHstutipraNidhAnam.itx

Category : devii, devI, buddha, stuti

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# Vajrayoginyah Stutipranidhanam

# વજ્રયોગિન્યાઃ સ્તુતિપ્રણિધાનમ્

ૐ નમઃ શ્રી વજ્રયોગિન્યૈ, નમોબુદ્ધધર્મસઙ્ઘેભ્યઃ,
નમો ગુરુબુદ્ધબોધિસત્ત્વેભ્યઃ, નમો લોચનાદિદશવજ્રવિલાસિનીભ્યઃ,
નમો યમાન્તકાદિદશક્રોધવીરેભ્યઃ સપ્રજ્ઞેભ્યઃ ।

ૐ ઓ આ હૂં ઇતિ કાયવાકચિત ઇન્દ્રિયવિજ્ઞાનાનિ, વાકચિત્તાનિ મનોવિજ્ઞાનાનિ,
પરચિત્તજ્ઞાનાભિજ્ઞા, પરકાયપ્રવેશાભિજ્ઞા પુણ્ડરીકેષુ નાભિસ્થે
રક્તસૂર્ય મણ્ડલઃ ॥ ૧॥

ધર્મોદયા પદ્મમધ્યે સિન્દૂરારુણરૂપિણી ।
ત્રિશૃઙ્ગા હિ ત્રિકોણા વા ચતુઃપીઠસમન્વિતા ॥ ૨॥

હ્રીઙ્કારં મધ્યભાગેઽસ્યાઃ પીતવર્ણઃ પ્રકીર્તિતઃ ।
તદ્ભવા પીતવર્ણા ચ અવધૂત્યા(તી) સ્વયં સ્થિતા ॥ ૩॥

લલનાયાં તુ સુશ્યામા રસનાયાં ચ ગૌરિકા ।
પ્રત્યાલીઢપદા નામ્ના મધ્યે પીતા મનોરમા ॥ ૪॥

ત્રિમાર્ગે સંસ્થિતા દેવી ત્રિકાયવજ્રયોગિની ।
સેયં નામ્ના ભવેદેકા સર્વસમ્બુદ્ધડાકિની ॥ ૫॥

ત્રૈલોક્યે દિવ્યરૂપા ચ સર્વાશાપરિપૂરિકા ।
સ્વકર્તિના કર્તિતં ચ વામહસ્તે સ્વમસ્તકમ્ ॥ ૬॥

દક્ષિણેઽસ્યા સ્થિતા કર્તિર્જગતો દુઃખચ્છેદિની ।
અસ્યા વામે સ્થિતા શ્યામા નામ્ના સા વરવર્ણિની ॥ ૭॥

કર્પરઃ સવ્યહસ્તે ચ કર્તિર્વામે ચ સંસ્થિતા ।
દક્ષિણે ચૈવ પીતા વૈ વજ્રવૈરોચની સ્થિતા ॥ ૮॥

કર્તિકા દક્ષિણે હસ્તે વામે કપાલધારિણી ।
પ્રત્યાલીઢપદા દેવી નગ્નિકા તુ વિશેષતઃ ॥ ૯॥

કરૌ ચ દ્વૌ તયોઃ પાદૌ વિપરીતૌ તથા સ્થિતૌ ।
બુદ્ધાનાં જનની મધ્યા સમ્યક્સમ્બુદ્ધરૂપિણી ॥ ૧૦॥

અક્ષયા સુભગા નિત્યં હન્ત્રી ચ મૃત્યુજન્મનોઃ ।
ધર્મસમ્ભોગનિર્માણમહાસુખસ્વરૂપિણી ॥ ૧૧॥

સેયં ત્રિભુવને દેવી રાજયે ચન્દ્રવત્સદા ।
કબન્ધાદવધૂત્યાશ્ચ પ્રવિશેત્સ્વમુખેષ્વસૃક્ ॥ ૧૨॥

લલનારસનાભ્યાં ચ નિઃસૃત્ય શિરસિ તથા ।
કરૂણારક્તરૂપેણ પિબન્તી સર્વશાન્તયે ॥ ૧૩॥

દુઃખં સંપ્રેક્ષ્ય લોકાનાં ચતુર્મારનિષૂદિની ।
દૌર્મનસ્યાદિ કર્ત્યા ચ કર્તન્તી સર્વમેવ તત્ ॥ ૧૪॥

સ્તુતા હિ જિનમાતસ્ત્વં સુપ્રસીદ ભવાર્ણવે ।
સ્વાર્થં કર્તું પરાર્થં ચ ભવામ્યહં યથા ક્ષમઃ ॥ ૧૫॥

તત્ત્વયા દેવી કર્તવ્યમનુગ્રહં મયિ સૃજ ।
બાલોઽહમજ્ઞરૂપી ચ કાયવાકચિત્તદોષતઃ ॥ ૧૬॥

ગુરુભક્તિં ન જાનેઽહં ત્વદ્ભક્તિં ચ વિશેષતઃ ।
ઇત્યાકલય લોકેશિ કૃપા મયિ વિધીયતામ્ ॥ ૧૭॥

કાયવાકચેતસાં સામ્યં કુરુ મે ત્વં પ્રસાદતઃ ।
યેન મુઞ્ચામિ સંસારં ષડ્ગતિં ન વિશામ્યહમ્ ॥ ૧૮॥

યથા ચ વજ્રવદ્દેહો યાવન્મુક્તો ભવામ્યહમ્ ।
મારૈઃ સર્વૈઃ પરિત્યક્તો યથા કાયો ભવેન્મમ ॥ ૧૯॥

લીલયા સિદ્ધિભાગાઃ સ્યુર્નિર્વિઘ્નઃ સર્વસિદ્ધિભાક્ ।
સર્વસાધનસિદ્ધિ સ્યાત્ કાયશ્ચૈવાજરામરઃ ॥ ૨૦॥

ત્રાસનં સર્વમારાણાં સર્વાશાપરિપૂરણમ્ ।
દેહિ મે ત્વં વરાં સિદ્ધિં હિત્વા ચૈવ ગમાગમમ્ ॥ ૨૧॥

મનો વિલીયતાં દેવિ પઞ્ચેન્દ્રિયાનુસંયુતમ્ ।
સિદ્ધ્યેચ્ચ વજ્રસત્ત્વાયુર્યૌવનારોગ્યસત્સુખમ્ ॥ ૨૨॥

ત્વત્પ્રસાદાન્મહામુદ્રા સર્વેષામેવ સમ્ભવેત્ ।
દેવાસુરમનુષ્યાશ્ચ યત્ર યત્ર ચ સંસ્થિતાઃ ।

સુખિનસ્તે ચ સર્વે સ્યુર્બુદ્ધત્વફલલાભિનઃ ॥ ૨૩॥

ઇતિ શ્રીગુહ્યસમયતન્ત્રે ત્રિકાયવજ્રયોગિન્યાઃ સ્તુતિપ્રણિધાનં સમ્પૂર્ણમ્ ।
ઇતિ સિદ્ધાચાર્યકૃતં શ્રીવિરૂપાદાનામ્ સમ્પૂર્ણમ્ ॥

---

*Vajrayoginyah Stutipranidhanam*
pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*